असि मामिह । तदहं ज्ञातुमिच्छामि तापत्यार्थविनिश्चयम् । तपती नाम का चैषा तापत्या यत्कृते वयम् । कौन्तेया हि वयं साधो ! तत्त्वमिच्छामि वेदितुम् । वैशम्पायन उवाच । एवमुक्तः स गन्धर्वः कुन्तीपुत्रं धनञ्जयम् । विश्रुतां त्रिषु लोकेषु श्रावयामास वै कथाम् । गन्धर्व उवाच । हन्त ते कथयिष्यामि कथामेतां मनोरमाम् । यथावदखिलां पार्थ ! सर्वबुद्धिमतांवर ! । उक्तवानस्मि येन त्वां तापत्या इति यद्वचः” ।

“य एष दिवि धिष्ण्येन नाकं व्याप्नोति तेजसा । एतस्य तपती नाम बभूव सदृशी सुता । विवस्वतो वै देवस्य सावित्र्यवरजा विभोः । विश्रुता त्रिषु लोकेषु तपती तपसा युता । न देवी नासुरी चैव न यक्षी न च राक्षसी । नाप्सरा न च गन्धर्वी तथा रूपेण काचन । सुविभक्तानवद्याङ्गी स्वसितायतलोचना । स्वाचारा चैव साध्वी च सुवेशा चैव भामिनी । न तस्याः सदृशं किञ्चित् त्रिषु लोकेषु भारत ! । भर्त्तारं सविता मेने रूपशीलगुणश्रुतैः । सम्प्राप्तयौवनां पश्यन् देयां दुहितरन्तु ताम् । नोपलेभे ततः शान्तिं सम्प्रदानं विचिन्तयन् । अथर्क्षपुत्त्रः कौन्तेय ! कुरूणामृषभो बली । सूर्य्यमाराधयामास नृपः संवरणस्तदा । अर्घ्यमाल्योपहाराद्यैर्गन्धैश्च नियतः शुचिः । नियमैरुपवासैश्च तपोभिर्विविधैरपि । शुश्रूषुरनहंवादी शुचिः पौरवनन्दनः । अंशुमन्तं समुद्यन्तं पूजयामास भक्तिमान् । ततः कृतज्ञं धर्मज्ञं रूपेण सदृशं भुवि । तपत्याः सदृशं मेने सूर्य्यः संवरणं पतिम् । दातुमैच्छत्ततः कन्यां तस्मै संवरणाय ताम् । नृपोत्तमाय कौरव्य ! विश्रुताभिजनाय च” । भा० आ० १७१ अ० ।

**तपन** पु० तप—ल्यु । १सूर्य्ये २भल्लातकवृक्षे । ३अग्न्यादौ दाहयुक्ते नरकभेदे ४ग्रीष्मे च हेम० । ५अर्कवृक्षे ६क्षुद्राग्निमन्थवृक्षे ७सूर्य्यकान्तामणौ च राजनि० । “पञ्चमः पञ्चतपसां तपनो जातवेदसाम्” माघः । स्त्रीणां यौवने ८सत्वजातावङ्कारभेदे न० सा० द० । “यौवने सत्वजास्तासामष्टाविंशतिसंख्यकाः । अलङ्काराः” इत्युपक्रमे “विकृतं तपनं मौग्ध्यम्” इत्यादिना विभज्य “तपनं प्रियविच्छेदे स्मरावेशोऽथ चेष्टितमिति” लक्षितम् । ९अग्निभेदे पु० “ते जातवेदसः सर्वे कल्माषः कुसुमस्तथा । दहनः शोषणश्चैव तपनश्च महाबलः । स्वाहाकारस्य विषये विख्याताः पञ्च वह्नयः” हरिवं १८० अ० । १०शिवे पु० । “यज्ञवाहाय दान्ताय तप्याय तपनाय च” भा० शा० २८६ अ० शिवस्तुतिः भावे ल्युट् । ११तापेन० धरणिः ।

**तपच्छद** पु० तपनप्रियः छदोऽस्य । दमनकवृक्षे राजनि० ।

**तपनतनय** पु० ६त० । १यमे २यमुनायां, ३शमीवृक्षे च स्त्री राजनि० । ४कर्णे ५सुग्रीवे च पु० तपनसुतादयोऽप्यत्र ।

**तपनमणि** पु० तपनतेजस्को मणिः । सूर्य्यकान्तमणौ राजनि० ।

**तपनात्मजा** स्त्री ६त० । १गोदावरीनद्यां हेम० । २यमुनायां च । ३यमे ४कर्णे ५सुग्रीवे च पु० । [नद्यां हेमच० ।

**तपनी** स्त्री तप्यते पापमनया तप—ल्युट् ङीप् । गोदावर्य्यां

**तपनीय** न० तप-अनीयर् । १स्वर्णे कनकधुस्तूरे च अमरः । “भक्यानि तु तपनीयसंक्रमस्य” माघः । “असंस्पृशन्तौ तपनीयपीठम्” रघुः । स्वार्थे क । तपनीयक सुवर्णे राजनि० ।

**तपनेष्ट** न० ६त० । ताम्रे धातौ राजनि० । तद्धातोः सूर्य्यप्रियत्वात् तथात्वम् ।

**तपस्** न० तप—असुन् । आलोचनात्मके ईश्वरज्ञानभेदे अन्तर्यामिब्राह्मणभाष्ये दृश्यम् । २लग्नावधिकनवमस्थाने ज्यो० ३स्वाश्रमविहितकर्मणि ४वैधक्लेशजनके कर्मणि । “तपोनानशनात्परम्” । ५क्षुत्पिपासाशीतोष्णादिद्वन्द्वसहने । ६चित्तप्रसादहेतुभूते व्रतनियमोपासनादिकर्मणि । ७मौनादिव्रते” ८कायेन्द्रियमनसां समाधाने ९शास्त्रीयमार्गेण कायेन्द्रियमनसां शोषणे । १०कृच्छ्रचान्द्रायणप्रजापत्यादिरूपे प्रायश्चित्ते । ११शास्त्रविहिततप्तशिलारोहणादौ । १२वानप्रस्थस्यासाधारणधर्मे । तपश्च शारीरादिभेदात् त्रिविधम् यथाह “देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते । अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत् । स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते । मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत् तपोमानसमुच्यते” गीता । तदपि सात्त्विकादि भेदात् त्रिविधम् यथाह “श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तं सात्त्विकं परिचक्षते । सत्कारमानपूजार्थं तपोदम्भेन चैव यत् । क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् । मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः । परस्योत्सादनार्थं वा तत् तामसमुदाहृतमिति” गीता । १३मनइन्द्रियाणामैकाग्र्ये “मनसश्चेन्द्रियाणाञ्च ह्यैकाग्र्यं परमन्तपः” इत्युक्तेः १४जनोलोकादूर्द्ध्वस्थे लोकभेदे । “तस्योपरि तपो-